# Shri Sharada Devi Suprabhatam

# श्रीशारदादेवीसुप्रभातम्

## Document Information

Text title : Shri Sharada Devi Suprabhatam

File name : shAradAdevIsuprabhAtam.itx

Category : deities_misc, gurudev, rAmakRiShNa, suprabhAta

Location : doc_deities_misc

Author : Swami Achalanandasarasvati

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीशारदादेवीसुप्रभातम्

मातः समस्तजगतां परमस्य पुंसः
शक्तिस्वरूपिणि शिवे करुणार्द्रचित्ते ।
लोकस्य शोकशमनाय कृतावतारे
श्रीशारदेऽस्तु शिवदे तव सुप्रभातम् ॥ १॥

बालो भवस्य तमसः परिहारयित्रे
लीलामनुष्यवपुषेऽथ गदाधराय ।
दत्ते तदर्पितधियाऽऽप्तसमस्तविद्ये
श्रीशारदेऽस्तु शुभदे तव सुप्रभातम् ॥ २॥

बाल्यात् परे वयसि भर्तरि सम्प्रवृत्ता-
मुन्मत्त इत्यनुचितामवधूय वार्ताम् ।
तद्दर्शनक्रमितदुर्गमदूरमार्गे
श्रीरामकृष्ण दयिते तव सुप्रभातम् ॥ ३॥

संन्यासितं पतिमवेक्ष्य च नोद्विजाने
सेवार्पितत्रिकरणे परिशुद्धचित्ते ।
तत्साधनाचरमसीम्नि समर्पिताङ्घ्रे
श्रीरामकृष्ण परमेश्वरि सुप्रभातम् ॥ ४॥

यामेव चात्मजननीं भवतारिणीं च
सेवापरां तु बुबुधे गुरुरस्तभेदः ।
तस्याः समस्तजगतोऽस्य शरण्यमूर्तेः
श्रीरामकृष्ण दयिते तव सुप्रभातम् ॥ ५॥

आवृण्वती परमिकां प्रकृतिं स्वकीयां
संसारिणीव बहुदुःखजले भवाब्धौ ।
सर्वं सहे श्रितजनोद्धरणैकदीक्षे
श्रीरामकृष्णदयिते तव सुप्रभातम् ॥ ६॥

गेहस्य मार्जनविधौ मम कर्मशान्तिं
    नायात्यसङ्ख्य भुजनिष्क्रियमाणमेवम् ।
आकस्मिकोक्तिविवृताखिलशक्तिरूपे
    श्रीरामकृष्णदयिते तव सुप्रभातम् ॥ ७॥

श्रीरामकृष्णदयिते त्वदधीनसत्त्वे
    त्वद्भक्तवृन्दपरिपालिनि मुक्तिदात्रि ।
त्वद्भावरक्तहृदये त्वदभिन्नतत्त्वे
    मातः समस्त जगतां तव सुप्रभातम् ॥ ८॥

इति स्वामिअचलानन्दसरस्वतीप्रणीतं “श्रीश्रीशारदादेवीसुप्रभातम्” सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Shri Sharada Devi Suprabhatam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*